विट्खदिरः । इति शब्दचन्द्रिका ॥ पटोलः । आदित्यपत्रः । खदिरः । गन्धकः । इति राजनिर्घण्टः ॥

कुष्ठी, [न्] त्रि, (कुष्ठः अस्यास्तीति । कुष्ठ + इनिः ।) कुष्ठरोगयुक्तः । (यथा, मनुः । ३ । ७ ।
"क्षय्यामयाव्यपस्मारिश्वित्रिकुष्ठिकुलानि च" ॥)

कुष्मलं, क्ली, (कुष + "कुटिकुषिभ्यां क्मलन्" । उणां ४ । १८६ । इति क्मलन् ।) छेदनम् । विकशितम् । इत्युणादिकोषः ॥

कुष्माण्डः, पुं स्त्री, शिवस्य गणदेवताभेदः । (यथा, विष्णुपुराणे । १ । १२ । १३ ।
"कुष्माण्डा विविधै रूपैः महेन्द्रेण महामुने ! ।
समाधिभङ्गमत्यन्तं आरब्धाः कर्त्तुमातुराः" ॥)
भूणविशेषः इति मेदिनी ॥ (कुष्माण्डाकारत्वात् शिवगणभूणयोस्तथात्वम् ॥ कु ईषत् उष्मा अण्डेषु बीजेषु यस्य ।) वृहत्फललताविशेषः । कुम्‌ड़ा इति कोंहड़ा इति च भाषा । तत्पर्य्यायः । पुष्पावासः २ तिमिषः ३ ग्राम्यकर्कटी ४ । इति त्रिकाण्डशेषः ॥ कुष्माण्डकः ५ कर्कारुः ६ । इत्यमरः ॥ पुष्पफलः ७ । इति रत्नमाला ॥ कुष्माण्डी ८ कर्कोटिका ९ कुम्भाण्डी १० वृहत्फला ११ सुफला १२ कुम्भफला १३ नागपुष्पफला १४ सुनी १५ कूष्माण्डः १६ शिखिवर्द्धकः १७ । इति शब्दरत्नावली ॥ कूष्माण्डकः १८ । इत्यमरटीका ॥ अपि च ।
"कुष्माण्डं स्यात् पुष्पफलं पीतपुष्पं वृहत्फलम् ।
कुष्माण्डं वृंहणं वृष्यं गुरुपित्तास्रवातनुत् ॥
बालं पित्तापहं शीतं मध्यमं कफकारकम् ।
वृद्धं नातिहिमं स्वादु सक्षारं दीपनं लघु ॥
वस्तिशुद्धिकरं चेतोरोगहृत् सर्व्वदोषजित्" ॥ * ॥
अथ कोंहड़ी ।
"कुष्माण्डी तु भृशं लघ्वी कर्कारुरपि कीर्त्तिता ।
कर्कारुर्ग्राहिणी शीता रक्तपित्तहरा गुरुः ।
पक्वा तिक्ताग्निजननी सक्षारा कफवातनुत्" ॥
इति भावप्रकाशः ॥ अस्य फलगुणाः । मूत्राघातप्रमेहकृच्छ्राश्मरीनाशित्वम् । विण्मूत्रग्लपनत्वम् । तृष्णार्त्तिशमनत्वम् । जीर्णाङ्गपुष्टिप्रदत्वम् । शुक्रवृद्धिकारित्वम् । स्वादुतरत्वम् । अरोचकहरत्वम् । बलकारित्वम् । पित्तापहत्वम् । वल्लीफलानां मध्ये प्रवरत्वञ्च । इति राजनिर्घण्टः ॥ तस्य बालफलगुणाः । पित्तहरत्वम् । मध्यमफलगुणौ । कफकारित्वम् । अतिगुरुपाकित्वम् ॥ पक्वफलगुणाः । लघुपाकित्वम् । उष्णत्वम् । क्षाररसत्वम् । अग्निदीपनत्वम् । वस्तिशोधनत्वम् । सर्व्वदोषनाशित्वम् । हृद्यत्वम् । चित्तविकारिणः पथ्यत्वञ्च ॥ अस्य नाड़िकागुणाः । क्षाररसत्वम् । मधुरत्वम् । गुरुत्वम् । रूक्षत्वम् । रुचिकारित्वम् । वायुकफाश्मरीशर्करारोगनाशित्वञ्च ॥ अस्य मज्जगुणाः । शुक्रकारित्वम् । पित्तनाशित्वम् । वस्तिशोधनत्वञ्च । इति राजवल्लभः ॥

कुष्माण्डकः, पुं, (कुष्माण्ड + स्वार्थे कन् ।) कुष्माण्डः । इत्यमरः । २ । ४ । १५५ ॥ (यथा, भावप्रकाशे ।
"घृते तप्ते विनिःक्षिप्य खण्डान् कुष्माण्डसम्भवान् ।
वार्त्ताकुविधिना कुर्य्यात् प्रलेहतक्रनादिकम् ॥
वेसवारान्वितश्चैव घृते तलनपूर्ब्बकम् ।
कुष्माण्डकं फलं सिद्धं विदुः सुस्वादु सुन्दरम्" ॥
नागविशेषः । यथा, महाभारते । १ । ३५ । ११ ।
"नागः शङ्खमुखश्चैव तथा कुष्माण्डकोऽपरः" ॥)

कुष्माण्डी, स्त्री, (कुष्माण्ड + स्त्रियां जातित्वात् ङीष् ।) उमा । (मलिना ।) ओषधी । इति हेमचन्द्रः ॥ कर्कारुः । इति राजनिर्घण्टः ॥ यागक्रियाविशेषः । इति शब्दरत्नावली ॥

कुस इ कि भासने । इति कविकल्पद्रुमः ॥ (चुरां-पक्षे भ्वां-परं-अकं-सेट्-इदित् ।) पञ्चमस्वरी । इ कुंस्यते । कि कुंसयति कुंसति । भासनं दीप्तिः । इति दुर्गादासः ॥

कुस य इर् श्लिषि । इति कविकल्पद्रुमः ॥ (दिवां-परं-सकं-सेट् ।) य, कुस्यति बाला कान्तम् । इर्, अकुसत् अकोसीत् । अस्मात् पुषादित्वान्नित्यं ङ इत्यन्ये । इति दुर्गादासः ॥

कुसलं, क्ली, (कुस् + कलच् ।) कुशलम् । इत्यमरटीका ॥

कुसितः, पुं, (कुस + "कुसेरुम्भोमेदेताः" । उणां ४ । १०६ । इति इतः ।) जनपदः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

कुसिदायी, स्त्री, (स्त्र्यर्थे "वृषाकप्यग्निकुसितकुसिदानामुदात्तः" ।४।१।३७। इति प्रकृतेरैकारादेशो ङीप् च ।) कुसीदपत्नी । इति जटाधरः ॥

कुसिम्बी, स्त्री, (कौ पृथिव्यां शिम्बीति ख्याता । पृषोदरात् सः ।) शिम्बी । इति राजनिर्घण्टः ॥
("कुसिम्बिवल्लीप्रभवास्तु शिम्बाः" ॥
इति सुश्रुते सूत्रस्थाने ४६ अध्याये ॥)

कुसीदं, क्ली, (कुस् + "कुसेरुम्भोमेदेताः" उणां । ४ । १०६ । इति ईदप्रत्ययः । इह सूत्रे तृतीयप्रत्ययो ह्रस्वादिर्दीर्घादिश्चेति तन्त्रेणोपात्तः । वृषाकप्यग्नीति सूत्रे ह्रस्व एवेति वृत्तिकारहरदत्तादयः । यद्वा कुत्सितं निकृष्टरूपवृद्धिदानेनेत्यर्थः सीदति अधोमर्णो यत्र । पृषोदरात् साधुः । यथा वृहस्पतौ "कुत्सितात् सीदतश्चैव निर्विशङ्कैः प्रगृह्यते । चतुर्गुणं वाष्टगुणं कुसीदाख्यमतस्स्मृतम्" ॥) ऋणदानजीविका । वृद्ध्याजीवनम् । सुद् बाड़ि देओया इत्यादि भाषा । तत्पर्य्यायः । अर्थप्रयोगः २ वृद्धिजीविका ३ । इत्यमरः । २ । ९ । ४ ॥ यथा,—
"कुसीदकृषिवाणिज्यं प्रकुर्व्वीतास्वयंकृतम् ।
आपत्काले स्वयं कुर्व्वन्नैनसा युज्यते द्विजः ॥
बहवो वर्त्तनोपाया ऋषिभिः परिकीर्त्तिताः ।
सर्व्वेषामपि चैतेषां कुसीदमधिकं विदुः ॥
अनावृष्ट्या राजभयान्मूषिकाद्यैरुपद्रवैः ।
कृष्यादिके भवेद्बाधा सा कुसीदे न विद्यते ॥
शुक्लपक्षे तथा कृष्णे रजन्यां दिवसेऽपि वा ।
उष्णे वर्षति शीते वा वर्द्धनं न निवर्त्तते ॥
देशं गतानां या वृद्धिर्नानापण्योपजीविनाम् ।
कुसीदं सर्व्वतः सम्यक् संस्थितस्यैव जायते ॥
लब्धलाभः पितॄन् देवान् ब्राह्मणांश्चैव पूजयेत् ।
ते तुष्टास्तस्य तद्दोषं शमयन्ति न संशयः ॥
वणिक् कुसीदी दद्यात्तु वस्त्रं गां काञ्चनादिकम् ।
कृषीवलोऽन्नपानानि यानशय्यासनानि च ॥
पण्येभ्यो विंशतिं दत्त्वा पशुस्वर्णादिकं शतम् ।
पादेनायस्य पारक्यं कुर्य्यात् सञ्चयमात्मवान् ॥
अर्द्धेन चात्मभरणं नित्यनैमित्तिकान्वितम् ।
पादञ्च प्राथमायस्य मूलभूतं विवर्द्धयेत् ॥
विद्या शिल्पं भृतिः सेवा गोरक्षं विपणिः कृषिः ।
वृत्तिर्भैक्ष्यं कुसीदञ्च दश जीवनहेतवः" ॥
इति गारुड़े २१५ अध्यायः ॥ * ॥ गोतमः ।
"कृषिगोरक्ष्यवाणिज्यवत्स्वयं कृतं कुसीदञ्चेति ।
कुसीदस्य पृथक् ग्रहणं स्वयंकृतस्याभ्यनुज्ञानार्थम्" ॥
कुसीदं वृद्धिकर्म्मेति प्रदेशान्तरेऽभिधानात् इति कल्पतरुः । वृहस्पतिः ।
"कुसीदं कृषिवाणिज्यं प्रकुर्व्वीतास्वयं कृतम् ।
आपत्काले स्वयं कुर्व्वन् नैनसा युज्यते द्विजः ॥
लब्धलाभः पितॄन् देवान् ब्राह्मणांश्चैव भोजयेत् ।
ते तुष्टास्तस्य तं दोषं शमयन्ति न संशयः ॥
वणिक् कुसीदी दद्यात्तु वस्त्रगोकाञ्चनादिकम् ।
कृषीवलोऽन्नपानानि यानशय्यासनानि च ॥
पण्येभ्यो विंशकं दत्त्वा पशुस्वर्णादिकं शतम् ॥
वणिक् कुसीददोषः स्यात् ब्राह्मणानाञ्च पूजनात् ।
राज्ञे दत्त्वा तु षड्भागं देवतानाञ्च विंशकम् ॥
त्रिंशद्भागञ्च विप्राणां कृषिं कृत्वा न दोषभाक्" ॥
तथा, मनुः ।
"अशीतिभागं गृह्णीयात् मासाद्वार्द्धुषिकः शतात् ।
द्विकं शतं वा गृह्णीयात् सतां धर्म्ममनुस्मरन् ॥
द्विकं शतञ्च गृह्णानो न भवत्यर्थकिल्बिषी ।
शतकार्षापणे अशीतिभागं विंशतिं पणान्" ॥
द्विकं पुराणादयम् । एवंविधनियममतिक्रम्य अनापदि स्वयमन्यद्वारा वा यः लाभच्छन्देन व्यवहरति तस्यैव प्रायश्चित्तम् । आपदि तु स्वयंकरणनियमातिक्रमे च न दोषः । इति प्रायश्चित्तविवेकः । इत्याह्निकाचारतत्त्वम् ॥ कुसीदिके त्रि । इति मेदिनी ॥

कुसीदायी, स्त्री, (कुसीदः कुसीदजीवी तस्य पत्नी । मुग्धबोधमते ईप् ऐश्च । पाणिन्यादिमते तु कुसितकुसिदशब्दाभ्यां ह्रस्वमध्याभ्यामेव ङीप् ऐश्च इति विशेषः । तदा "वृषाकप्यग्निकुसितकुसिदानामुदात्तः" । ४ । १ । ३७ । इति प्रकृतेरैकारादेशो ङीप् च ।) कुसीदपत्नी । इति जटाधरः ॥

कुसीदिकः, त्रि, (कुसीदं वृद्धिस्तदर्थं द्रव्यं कुसीदं तत् प्रयच्छति । "कुसीददशैकादशात् ष्ठन्ष्ठचौ" । ४ । ४ । ३१ । इति ष्ठन् ।) वृद्धिजीवी । तत्पर्य्यायः । वार्द्धुषिकः २ वृद्ध्याजीवः ३ वार्द्धुषिः ४ । इत्यमरः । २ । ९ । ५ ॥ कुसीदः ५ । इति शब्दरत्नावली ॥ कुसीदी ६ । यथा, आह्निकतत्त्वे ।
"वणिक् कुसीददोषः स्यात् ब्राह्मणानाञ्च पूजनात्" ॥

कुसुमं, क्ली, ("कुसेरुम्भोमेदेताः" । उणां ४ । १०६ । इति उमः । निपातनात् गुणाभावः ।) पुष्पम् । (यथा, ऋतुसंहारे वसन्तवर्णने ४ ।